International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 162-164
© 2022 IJSR
www.anantaajournal.com
Received: 15-01-2022
Accepted: 28-02-2022

**Dr. S Umapathi**
Assistant Professor,
The Madras Sanskrit College,
Chennai, Tamil Nadu, India

**Corresponding Author:**
**Dr. S Umapathi**
Assistant Professor,
The Madras Sanskrit College,
Chennai, Tamil Nadu, India

# श्रीकृष्णप्रेमिमहात्मनः कृतेः वसन्तोत्सवस्य रूपकभेदपरिशीलनम्

## S Umapathi

### प्रस्तावना

‘नाटकान्तं कवित्वमि’ति वचनेन सुष्ठु ज्ञायते यत् कवेरनितरसाधारण्यतुलनादण्डो भवति नाटकमिति । एवमेव सकलेन्द्रियव्यापारवत् दृश्यकाव्यमेव सर्वजनाराधकं भवतीति स्पष्टम् । एतादृशमिदं नाटकं दशरूपकेष्वन्यतमम् । तानि च दशरूपकाणि –

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ इति ।

एवमेव ‘‘नाटिका’ इत्येकमुपरूपकं यद्यपि दशरूपके प्रोक्तं, तथापि दर्पणकाराणां वचसा नाटिका - त्रोटक - गोष्ठी - सट्टक - नाट्यरासक - प्रस्थानक - उल्लाप्य - काव्य - प्रेङ्खण - रासक - सल्लापक - श्रीगदित - शिल्पक - विलासिका - दुर्मल्लिका - प्रकरणिका - हल्लीश - भणिका इत्याद्यष्टादशोपरूपकाणि ज्ञायन्ते । किञ्च एतद्रूपकोपरूपकविषयकमतभेदा अपि दृष्टिपथमायान्त्यनेकत्र ।

एतादृशदृश्यकाव्यजातस्य प्रथमलक्षणकर्ता वर्तत आचार्यभरतमुनिः । तस्य नाट्यशास्त्रं सर्वप्राचीनप्रमाणत्वेनाङ्गीक्रियत आलङ्कारिकैः । किञ्च अभिनवगुप्तस्य *अभिनवभारती*, शारदातनयस्य *भावप्रकाशनम्*, रूपगोस्वामिनः *नाटकचन्द्रिका*, सागरनन्दिनः *नाटकलक्षणरत्नकोशः*, रामचन्द्रगुणचन्द्रयोः *नाट्यदर्पणः*, भोजराजस्य *शृङ्गारप्रकाशिका*, धनिकस्य *दशरूपकम्*, विश्वनाथस्य *साहित्यदर्पणः*, चिन्तामणिमिश्रस्य *वाङ्मयविवेक* इत्याद्यनेकग्रन्थाः रूपकविषये प्रमाणभूताः । परमेतेषामाचार्याणां रूपकलक्षणकथने वैविध्यं दृश्यते। उदाहरणतया दशरूपककाराः नाटिकान्यतया प्रकरणिकायाः सत्त्वं नेच्छन्ति, परमन्ये आचार्याः नाटकान्न्यूनत्वं नाटिकायाः, प्रकरणाद्धीनत्वं प्रकरणिकायाश्चाङ्गीकुर्वन्ति। एवमेव नायक - अङ्क - पात्रादिविषये च भिन्नमतत्वं ज्ञायते । किञ्च चिन्तामणिमिश्रादयः धनञ्जयमतानुसारं [1] नाटकादि रूपकदशकं, नाटिकादि मार्गदशकम्, श्रीगदितादि षोडश देशिनश्चेति विभजन्ते। एवं सत्सु नानाभेदवत्सु रूपकोपरूपकादिषु, श्रीकृष्णप्रेमिमहात्मनः वसन्तोत्सवनाटकम् इत्यस्य दृश्यस्य कुत्रान्तर्भाव ? इति किञ्चिदिवालोच्यतेऽधुना।

श्रीराधामाधवयोः ललिताद्यष्टसखीभिः सह निकुञ्जरासलीलावर्णनात्मकमिदं दृश्यकाव्यमङ्कत्रयघटितं वर्तते । तथा च रूपकस्यास्य नाटकमिति व्यवहारः लोकसामान्यव्यवहारेणैव, न तु शास्त्रानुगुणम्, त्रोटकान्तर्भूतविक्रमोर्वशीयस्य नाटकत्वव्यवहारवत्। अपरञ्च नानागीतगुम्फितं भवति काव्यमिदम्। अमुष्मिंश्च दृश्ये नायको भवति धीरललितः श्रीकृष्णः, नायिका च श्रीराधा । तथैव ललिताद्यष्टस्त्रीपात्राणि च विद्यन्तेऽत्र । गर्गसंहितादिग्रन्थेतिवृत्ताश्रयत्वं दृश्यते कथावस्तुनः । नायकमतिरिच्य बलरामादिद्वित्राणि पुंपात्राण्यपि उपयुक्तानि कविना । एतादृशवस्तुपात्रादिभिर्ग्रथितस्यास्य रूपकस्य प्राचीनाचार्योक्तरूपकादिषु कुत्रान्तर्भाव ? इत्याकाङ्क्षायां, धीरोदात्तनायकवन्नाटके नान्तर्भवति, धीरललितनायकवत्वात्, अङ्कत्रयघटितत्वाच्च । एवं प्रत्येकं रूपके उपरूपके वा अस्य अनन्तर्भावकारणस्य सुलभावगत्यै तालिकारूपेण, तत्रापि अधःकृतरेखाङ्केन च विव्रियते-

इत्थमनेकरूपकप्रभेदेषु प्रकृतदृश्यस्य अन्तर्भावसुकरत्वाभावं विचिन्त्य अधिकसाम्यवद्रूपकेषु अन्वेषणे कृते नाटिका - प्रकरणिका - सट्टक - हल्लीशादीनां धीरललितनायकत्वात्समन्वयोऽन्वेषितः।

तत्र ‘वस्तु नेता रसस्तेषां भेदकः’[2] इति नियमानुसारमालोच्यमाने, नाटिकायां यद्यपि नायक - रसविषयसाम्यं दृश्यते तथापि वस्तुनि भेदो भवति। नाटिकालक्षणमेवमुक्तं दशरूपके –

---

[1] द.रू.१.९
[2] द.रू. १.११

| रूपकनाम | नायकः | रसः | वस्तु | अङ्कः |
|---|---|---|---|---|
| नाटकम् | धीरोदात्तः/धीरोद्धतः | शृङ्गारः/वीरः | भारतीवृत्तिः इतिहासप्रसिद्धम् | ५-१० |
| प्रकरणम् | धीरशान्तः | शृङ्गारः | उत्पाद्यम् | ५-१० |
| भाणः | धूर्तनायकः | हास्यः/शृङ्गारवीरौ | भारतीवृत्तिः | १ |
| प्रहसनम् | पाखण्डिविप्रादयः | हास्यः | कल्पितवृत्तम् | |
| डिमः | देवगन्धर्वयक्षादयः/षोडशोद्धताः | हास्यशृङ्गाररहिताः | प्रसिद्धम् | ४ |
| व्यायोगः | धीरोद्धतः | हास्यशृङ्गारशान्तभिन्नाः | भारतीवृत्तिः | १ |
| समवकारः | द्वादशनायकाः | वीरः | ख्यातं देवासुराश्रयम् | ३ |
| वीथी | धूर्तनायकः | शृङ्गारः | द्व्येकपात्रप्रयोजिता/कैशिकीवृत्तिः | १ |
| अङ्कः | प्राकृतनराः | करुणः | प्रख्यातम् | १ |
| ईहामृगः | नरदिव्यौ/उद्धतौ | अल्पशृङ्गारः | मिश्रम् | ४ |
| नाटिका | धीरललितः | शृङ्गारः | कल्पितम् | ४ |
| उल्लाप्यम् | उदात्तः | हास्यशृङ्गारकरुणरभिन्नाः | बहुसंग्रामः | १/३ |
| काव्यम् | स्त्रीनायकम् | हास्यः | आरभटीहीनम् | १ |
| गोष्ठी | प्राकृताः १०,९ नायकाः | शृङ्गारः | | १ |
| त्रोटकम् | दिव्यमानुषौ | शृङ्गारः | प्रत्यङ्कविदूषकम् | ७,८,९,५ |
| दुर्मल्लिका | न्यूननायकः | हास्यः | कैशिकीवृत्तिः | ४ |
| नाट्यरासकम् | पीठमर्दयुक्तः उदात्तः | हास्यः | | १ |
| प्रकरणिका | सार्थवाहः धीरललितः | शृङ्गारः | कविकल्पितम् पञ्चसन्धिमत् | ४ |
| प्रस्थानकम् | हीननायकः | शृङ्गारः | सुरापानम् | २ |
| प्रेङ्खणम् | हीननायकः | वीरः | सूत्रधाररहितम् सर्ववृत्तिसमाश्रितम् | १ |
| भणिका | मन्दनायकः उदात्तनायिका | हास्यः | कैशिकी- भारतीवृत्तियुता | १ |
| रासकम् | मूर्खनायकः ख्यातनायिका | हास्यवीरौ | भाषाविभाषाभूयिष्ठम् | १ |
| विलासिका | हीननायकः | शृङ्गारः | स्वल्पवृत्ता | १ |
| शिल्पकम् | ब्राह्मणः | शान्तहास्यभिन्नाः | श्मशानादेःवर्णना | ४ |
| श्रीगदितम् | प्रख्यातोदात्तनायकौ | शृङ्गारवीरौ | प्रख्यातवृत्तम् श्रीशब्दबहुलम् | १ |
| सट्टकम् (नाटिकासमं) | धीरललितः | अद्भुतः | प्रवेशविष्कम्भ-राहित्यम् | जवनिका |
| संल्लापकम् | पाषण्डः | शृङ्गारकरुणभिन्नाः | परसंरोधसङ्ग्राम-विद्रवाः | ४ |
| हल्लीशः | धीरललितः | शृङ्गारः | कैशिकीवृत्तिः सन्धिद्वयवत् | १/२ |

तत्र वस्तु प्रकरणान्नाटकान्नायको नृपः।
प्रख्यातो धीरललितः शृङ्गारोऽङ्गी सलक्षणः।
स्त्रीप्रायचतुरङ्कादिभेदकं यदि चेष्यते॥[3]

इति वस्तु प्रकरणवदित्युक्तम्। प्रकरणलक्षणन्तु तत्रैव - 'अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्'[4] इति कविकल्पितवस्तु प्रोक्तम्। किञ्च चतुरङ्काः कथिताः। एवमेव-

देवी तत्र भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा।
गम्भीरा मानिनी, कृच्छ्रात्तद्वशान्नेतृसङ्गमः॥[5]

इति धनञ्जयवाक्येन, आचार्यविश्वानाथवचसा -

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
सम्प्रवर्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥[6]

इत्यादिना च नाटिकाया कथावस्तुनोऽपि स्वरूपमुक्तं वर्तते, यथा *रत्नावली*त्यादि। अत्र तु तादृशी कथा नास्ति, नापि चतुरङ्कत्वम् इति हेतोः नाटिकायामस्यान्तर्भावः नोचित इति भाति।

एवमेव सट्टकं नामोपरूपकं यद्यपि धीरललितनायकवत्, तथापि विष्कंभ प्रवेशकराहित्यं, जवनिकाख्याङ्काः, अद्भुतरसश्च सट्टक - प्रकृतदृश्यस्य भेदका इति कारणान्न तत्रान्तर्भावो युक्तः। एवमेवोपरूपकभूतायां प्रकरणिकायामप्यस्य समावेशो न युज्यते, नाटिकाया अवान्तरभेदत्वात् तस्याः प्रकरणिकायाः। उक्तञ्च *साहित्यदर्पणे* –

नाटिकैव प्रकरणी सार्थवाहादिनायका।
समानवंशजा नेतुर्भवेद्यत्र च नायिका॥[7] इति।

अत्र यद्यपि प्रकृतवसन्तोत्सवदृश्यनायकस्य कृष्णस्य बृन्दावने नन्दगोपकुमारत्वात् 'वयं गोवृत्तयोऽनिशम्' [8] इति कृष्णस्य वचनाच्च सार्थवाहत्वम् अर्थात् वाणिज्यकर्तृत्वं वक्तुं शक्यते, नायिकाया श्रीराधाया अपि नेतृसमानवंशोत्पन्नत्वं युज्यते, तथापि 'नाटिकावत्' इति कथितत्वात् इतिवृत्तं कविकल्पितं भवेदित्यापतितम्। किञ्च नाटिकायां सन्धिपञ्चकं प्रोक्तम्। अत्रापि प्रकरणिकायां ते सन्धयः मुखप्रतिमुखादयो वर्णनीया भवन्ति। किञ्च धनञ्जयेन प्रकरणिकाया असत्वमपि निरूपितम्।[9] तेन हेतुना प्रकरणिकायामपि प्रकृतदृश्यस्यान्तःपातित्वं न साम्प्रतमिति भाति। अन्ते हल्लीशनामके उपरूपके प्रकृतदृश्यान्तर्भावः इष्यते। अयं हल्लीशः 'हल्लीसक, हल्लीस, हल्लीशक' आदिनानानाम्ना निर्दिष्टोऽस्ति साहित्यग्रन्थेषु। तत्राचार्यविश्वनाथः एवं वक्ति *साहित्यदर्पणे* –

[3] तत्रैव ३.४३,३.४४
[4] तत्रैव ३.३९
[5] तत्रैव ३.४५,३.४६
[6] सा.द. ६.२०९,६.३७१
[7] तत्रैव ६.३०६
[8] श्री.भा १०.२४.२१d
[9] द.रू. ३.४२/४३

हल्लीश एक एवाङ्कः सप्ताष्टौ दश वा स्त्रियः। वागुदात्तैकपुरुषः कैशिकी वृत्तिरुज्ज्वला।
मुखान्तिमौ तथा सन्धी बहुताललयस्थितिः ॥[10] इति।

अत्र हल्लीशस्य यल्लक्षणं प्रोक्तं तत्प्रायः वसन्तोत्सवदृश्येऽन्वेतीति भाति। यतः 'एकपुरुषः' इत्यनेन 'एकनायकत्वम्' विवक्षितम्। तदप्यत्र प्रकृते श्रीकृष्णस्यैकस्यैव नायकत्वाद्युज्यते। 'सप्ताष्टौ दश वा स्त्रियः' इति कथनेन स्त्रीबाहुल्यं विवक्षितम्, प्रकृते श्रीराधा, तत्सख्य इति स्त्रीपात्रनवकं वर्तते। लक्षणे नवशब्दनिर्देशाभावेऽपि सप्तारभ्य दशपर्यन्तार्थकवाक्येन नवसंख्या न दोषाय। उक्तञ्च शारदातनयेन 'अथ हल्लीसकं सप्तनवाष्टदशनायिकम्'[11] इति। एवं 'कैशिकीवृत्तिः' इत्युक्तम्। कैशिक्या लक्षणं चोक्तं धनञ्जयेन - '.... तत्र कैशिकी । गीतनृत्यविलासाद्यैर्मृदुः शृङ्गारचेष्टितैः'[12] इति । एतादृशगीत - नृत्य - विलासानां सत्त्वात् प्रकृते कैशिकीवृत्तिर्वर्तत एव। 'मुखान्तिमौ' इति मुखनिर्वहणसन्धी प्रोक्तौ। तदुभयमप्यत्र वर्तते। एवं 'बहुताललयस्थितिः' इत्यनेन यन्नृत्तमुक्तं तदप्यस्तीति हेतोः प्रायः हल्लीशलक्षणानुसारीदं दृश्यम्।

अथ च रसविषये किमपि नोक्तं लक्षणे, यन्निमित्ततया रूपकेषु भेदः प्रोक्तः आचार्येण 'वस्तु नेता रसस्तेषां भेदकः' इति। तस्य समाधिश्चैवं - 'नाटिका इति स्त्रीसमाख्यया औचित्यप्राप्तं स्त्रीप्रधानत्वम्'[13] इति, यथा वा औचित्येन व्यवहारः कृतस्तथैवात्रापि स्त्रीपात्रबहुलत्वात्, कैशिकीवृत्तेस्सत्वाच्च शृङ्गाररसः औचित्यप्राप्तः । स च शृङ्गारः वसन्तोत्सवेऽपि अङ्गी वर्तते।

किञ्च लक्षणे 'एकएवाङ्क' इति अङ्कैकत्वं निर्दिष्टम्। परमत्र त्रयः अङ्काः दृश्यन्ते। अतोऽत्र लक्षणविरुद्धं लक्ष्यमिति नाशङ्कनीयम्। तत्र च कारणमिदं द्वयं भवितुमर्हति यत् समग्रस्य *वसन्तोत्सवदृश्यस्य* एकदिनचरित्रत्वात् 'एकाहाचरितैकार्थमित्थमासन्ननायकम् । पात्रैस्त्रिचतुरैरङ्कम्'[14] इति एकदिवसप्रवृत्तस्य अङ्कत्वव्यवहारः प्रोक्तः । अत्रापि एकदिनव्यापिवस्तुनः एकाङ्ककथने न दोषः। अपरञ्चेदं समाधानं यदङ्कविषये क्वचिद्भेदोऽपि दृश्यते आचार्याणाम्। यथा ईहामृगविषये धनञ्जयशारदातनयौ अङ्कचतुष्टयमिच्छतः -

'मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिमत्'[15] 'अङ्काश्चत्वार एवात्र सविष्कम्भप्रवेशकाः'[16] इति। अस्मिन्नेव विषये नाट्यदर्पणे 'एकाङ्कश्चतुरङ्को वा ख्याताख्यातेतिवृत्तिवान्'[17] इति एकाङ्कस्य वैकल्पिकं प्रदर्शयतः रामचन्द्रगुणचन्द्रौ। अतः अत्रापि अङ्कभेदे न तावान् दोषो भवितुमर्हति।

किञ्च हल्लीशाङ्कविषयेऽपि शारदातनयः वैकल्पिकं वदति इति *भोजशृङ्गारप्रकाश*विमर्शकेन डा.वि राघवन् महाभागेन एवं निर्दिष्टम् 'A Hallisa according to him (saradatanaya) has one or two acts and two sandhis, mukha and vimars'a.'[18] इति। अतः अङ्कत्रयेण न कापि हानिः। किं बहुना 'प्रत्यङ्कं सविदूषकम्'[19] इति त्रोटकस्य यल्लक्षणं प्रोक्तं, तद्राहित्येऽपि विक्रमोर्वशीयं त्रोटकस्योदाहृतम्, स्वयं विश्वनाथाचार्येण । अतः हल्लीशनामकोपरूपकस्य कृत्स्नं लक्षणमन्वितं भवत्यत्र *वसन्तोत्सवरूपके*।

किञ्च राधामाधवरासमण्डितेऽस्मिन् *वसन्तोत्सवरूपके* भोजराजस्य, अभिनवगुप्तस्य लक्षणमतिसामीचीन्यमाप्नोति यथा -

यन्मण्डलेन नृत्यं स्त्रीणां हल्लीसकं तत्प्राहुः।
तत्रैको नेता स्याद् गोपस्त्रीणामिव मुरारिः ॥[20] इति।

अतः *वसन्तोत्सवस्य* हल्लीसकान्तर्भाववत्वं युज्यते। किञ्च हल्लीशस्योपरूपकस्य लक्ष्यत्वेन 'केलिरैवतकम्' इति यद्यपि नामनिर्देशः कृतो वर्तते *भावप्रकाशिका - साहित्यदर्पण - नाटकालङ्काररत्नकोश - अलङ्कारसङ्ग्रह* इत्यादिग्रन्थेषु[21], तथापि तद्ग्रन्थस्य तालपत्रादिविषयेऽपि ज्ञानं लब्धुमशक्यं विद्यते। हल्लीशविषयकालोचनं कृतवता डा.वि राघवन् महाशयेनापि ग्रन्थस्यास्य स्पर्शः न कृतः । अतः अज्ञातकविविरचितः केलिरैवतक नामको ग्रन्थः हल्लीसस्योदाहरणभूत इति पूर्वस्थितिः।

परमिदानीं श्री श्रीकृष्णप्रेमिमहात्मनः '*वसन्तोत्सवरूपकम्*' इदं 'हल्लीश' दृश्यस्य लक्ष्यभूतं साहित्यभूमौ विशिष्टतया राराजते । अतः श्रीश्रीकृष्णप्रेमिमहात्मनः हल्लीशोपरूपकेऽन्तर्भावयितुं युज्यते एव॥

**उपयुक्तग्रन्थसूची**

1. श्रीमद्भागवतम् - Geetapress, Gorukapur, 1998.
2. दशरूपकम् - Harjivandas Sanskrit Granthamala, Ed. 1, Chaukamba Publishers, Varanasi, 2008.
3. साहित्यदर्पणम् - Kasi Sanskrit Series 145, Ed. 5, Chaukambha Sanskrit Bhavan, Varanasi, 1996.
4. भावप्रकाशनम् – Gaekwad`s Oriental Series, Oriental Institute, Baroda, 1968.
5. नाट्यदर्पणम् - Parimal Sanskrit Series 2, Ed. 2, Parimal Publications, Delhi, 1994.
6. शृङ्गारप्रकाशः – G.S. Joyser, Coronation Press, Mysore, 1995.
7. New Catalogues Cartogram – University of Madras, Chennai, Vol. 5.

[10] सा.द. ६.३०७
[11] भा.प्र. पृ २६६
[12] द.रू. २.४७
[13] तत्रैव ३.४४/४५
[14] तत्रैव ३.३६,३.३७
[15] तत्रैव ३.७२
[16] भा.प्र पृ २५३
[17] ना.द. २.२५८
[18] शृ.प्र पृ.५३७
[19] सा.द. ६.२७६
[20] शृ.प्र १०.पृ.३८२
[21] Ncc. Vol ५